# विषयसूचिका


| | | | पुटः |
|---|---|---|---|
| 1. | बालबोधसंग्रहः श्रीशङ्करभगवत्पादकृतः | .... | 1 |
| 2. | श्रीनरसिंहस्तवः " | .... | 8 |
| 3. | चिदानन्दात्मकस्तोत्रम् " | .... | 10 |
| 4. | सहजाष्टकम् " | .... | 12 |
| 5. | अनुभवोल्लासप्रकरणम् " | .... | 14 |
| 6. | त्रिपुरी " | .... | 1 |
| 7. | त्रिपुरीव्याख्या श्री आनन्दगिरिविरचिता | .... | 1 |
| 8. | दुर्वासनाप्रतीकारदशकम् - भगवत्पादकृतिः | .... | 1 |
| 9. | श्रीमत्क्रमस्तवः " | .... | 3 |
| 10. | प्रश्नोत्तरतत्वरत्नमाला - सुकवीन्द्रकृता | .... | 8 |
| 11. | सच्चिदानन्दभुजङ्गः | .... | 11 |
| 12. | अखण्डैकरसवाक्यार्थः | .... | 15 |
| 13. | तत्वानुभवप्रकरणम् - श्रीगोविन्देन्द्रयतिविरचितम् | .... | 18 |
| 14. | वेदान्तसंज्ञाप्रकरणम् | .... | 21 |
| 15. | दक्षिणामूर्तिविलासः - श्रीवासुदेवानन्दसरस्वतीकृतः | .... | 36 |
| 16. | ब्रह्मानन्दविलासः - श्रीशाश्वतानन्दस्वामिनाम् । | .... | 1 |
| 17. | सच्चिदानन्दस्वरूपविचारः | .... | 1 |
| 18. | आत्मबोधः श्रीपद्मपादाचार्यकृतटीकायुतः | .... | 1 |
| 19. | वेदान्तसारसंग्रहम् | .... | 18 |
| 20. | अद्वैतपञ्चरत्नं (सोपानपञ्चकं) व्याख्या - श्रीबालकृष्णानन्दस्वामिनां | .... | 1 |
| 21. | विवेकमुकुरः - श्रीनृसिंहभारतीशस्वामिना | .... | 20 |
| 22. | षट्पदीस्तवः व्याख्या - श्रीशङ्करानन्दतीर्थाना | .... | 27 |
| 23. | श्रीगोविन्दाष्टकम् ; टीका - श्रीआनन्दगिरिणा | .... | 52 |
| 24. | मनीषापञ्चकं ; टीका - श्रीबालगोपालयतीना | .... | 1 |

भक्त्याश्रिताभयवरोद्यतपाणिपद्मौ देवौ समानरचितासनसन्निविष्टौ ।
द्वारे पुरे परमदैवतदेवतायाः श्रीशंखपद्मकनिधी निदधामि मूर्ध्नि ॥ ११ ॥

चिन्तामणिप्रणयदक्षिणवाम्यभीतिदानोङ्कसत्कमलकोमलवामपाणीः ।
रक्तद्युतीः शशिधराः प्रकटाणिमाद्यास्त्रैलोक्यमोहनगताः परिपूजयामि ॥ १२ ॥

रक्तोत्पलामृतकपालधराः कराभ्यां वंशीतमालदलकोमलनीलदेहाः ।
ब्राह्म्यादिका रुचिरभूषणरक्तवस्त्रा मातॄर्द्वितीयचतुरस्रगता भजामि ॥ १३ ॥

पाशाङ्कुशाक्तियथायथवद्धयद्धमुद्राविमुद्रितकरां तरुणारुणाभाम् ।
श्रीमत्तृतीयचतुरस्रगसर्वपूर्वसंक्षोभपूर्वदलदैवतमर्चयामि ॥ १४ ॥

शोणाः सपाशसृणिपाणियुगाभिरामाः कामाद्यकर्षणमुखाः सुभगाश्च नित्याः ।
गुप्ता कलानिनिकलाः खलु सर्ववाञ्छासपूर्णषोडशदले परिपूजयामि ॥ १५ ॥

श्रीदेव्यचिन्त्यमहिमा अभिदीप्यमाना रक्ताः सुगुप्ततरनामधरा दयार्द्राः ।
शक्तीरनङ्गकुसुमादितयाष्ट सर्वसंक्षोभकेष्टदलके परिपूजयामि ॥ १६ ॥

शोणाः सचापशरपा खलु सर्वपूर्वसंक्षोभणादिकचतुर्दशदेवतास्ताः ।
सत्सम्प्रदायविधिना परिपूजयामि सौभाग्यदायकचतुर्दशकोणचक्रे ॥ १७ ॥

शुभ्रा वराभयकराः खलु सर्वपूर्वसिद्धिप्रदा दशदिशोद्भुतशक्तिशक्तीः ।
सर्वार्थसाधकवहिर्दशकोणचक्रे सम्पूजयामि कुलकौलिकयोगिनीस्ताः ॥ १८ ॥

कर्पूरपूररुचिराङ्गधराक्षमालाः श्रीतत्त्वपूजकभृतोऽतिनिगर्भदेवीः ।
सर्वार्थरक्षणकरे दशकोणचक्रे सर्वज्ञिकाप्रथमिका दश पूजयामि ॥ १९ ॥

चापेषुपुस्तकलसत्स्फटिकाक्षमाल बालप्रवालरुचिर वशिनीप्रधानम् ।
सर्वादिरोगहरचक्रवरे त्रिकोणे वाग्देवताष्टकमह सरहस्यमीडे ॥ २० ॥

रक्ता वराभयकराः शिरसा दधानाः पाशाङ्कुशेषुधनुरायुधभूषणानि ।
श्रीमत्त्रिकोणवहिरात्मकदेवतास्ता रक्षन्तु सन्ततमनन्तगुणाश्चतस्रः ॥ २१ ॥

श्रीमत्त्रिकोणवहिरात्मकदेवतास्ता देवीः षडङ्गयुवतीः परिपूजयामि ।
कुन्देन्दुकज्जलकठारपिशङ्गहव्यवाहश्रियोऽभयवरोद्यतपाणिपद्माः ॥ २२ ॥

समानाः स्वर्गतास्सर्वे न्यूना येप्यधिका मताः ।
अन्तरालविलम्बस्य जीविते का धृतिर्मम ॥ २०१ ॥

कुष्ठभूयिष्ठसर्वाङ्गकुस्त्रियालिङ्गितः पुमान् ।
यथा तां नाशयित्वाऽन्यां सुन्दरीं प्राप्य मोदते ॥ २०२ ॥

संसृत्याख्यमहादुष्टवनितालिङ्गितोऽप्यहम् ।
नाशयित्वा च तामन्यां मुक्तिकान्तां भजाम्यहम् ॥ २०३ ॥

जीवितं नाभिवाञ्छामि नाभिवाञ्छामि वा मृतिम् ।
अवर्जनीयमेव स्यादुभयं दैवयन्त्रितम् ॥ २०४ ॥

आगामिदेहराहित्यलक्षणा मुक्तिरुत्तमा ।
ब्रह्मात्मनिश्चयात्सिद्धा देहो जीवतु वा न वा ॥ २०५ ॥

निषेधात्र च भीतोऽहं न चाहं विधिकिंकरः ।
निषिद्धं विहितं वापि न करोमि यतः श्रमः ॥ २०६ ॥

कर्तृत्वविभ्रमो येषां सत्यानन्दचिदात्मनि ।
निषेधविधिसंबन्धस्तेषामेव न चात्मनि ॥ २०७ ॥

संसारनाशकामस्य देहनाशो गुणायते ।
वृश्चिकच्छेदकामस्य पुच्छच्छेदो यथा तथा ॥ २०८ ॥

ब्रह्मानन्दसमुद्रेऽस्मिन्निमग्नो नितरामहम् ।
किंवा शृणोमि पश्यामि किं गृह्णामि त्यजामि किम् ॥ २०९ ॥

प्रारब्धयन्त्रितं भुञ्जन्दुःखं वा यदि वा सुखम् ।
गृहान्तरविपत्त्या मे संपत्त्या वा न किंचन ॥ २१० ॥

ब्रह्मकल्पास्त्वसंख्याता बुद्बुदोपमतां गताः ।
तथैतद्देहसंपत्त्या विपत्त्या च न किंचन ॥ २११ ॥

जन्ममृत्युप्रवाहेऽस्मिन्मम संसारसागरे ।
मज्जनोन्मज्जनं पूर्वमज्ञानादागतं बहु ॥ २१२ ॥

रज्जुरेव दृढीभवतीति तद्वदित्यर्थः ।

पश्यति । नायं सर्पः किन्तुरज्जुरेवेति निषेधे कृते

तथाचोक्तं

देहाभिमाने गलिते विज्ञाते परमात्मनि ।
यत्र यत्र मनो याति तत्र तत्र समाधयः ॥ इति ॥

स्वप्नाभावे सुषुप्तौ तिष्ठति तदभावे तुरीयं

अवस्थात्रयातीतं जाग्रन्नाशे स्वप्नसाक्षित्वेन स्वप्ने तिष्ठति । तथाऽद्वैतं न हि तार्किकादेरीश्वरवत्तटस्थविषय-

मवतीत्यतीनं "असङ्गो ह्ययं पुरुष" इति श्रुतेः । विकल्पिताधिष्ठानं तदेवाहम् ॥ ५ ॥

मित्यर्थः । एकं सजातीयादिभेदरहितं यत्परं ब्रह्म

आत्मसत्ताव्यतिरेकेण जगदभावमुपदिशति—

यदानन्दलेशैः समानन्दविश्वं
यदाभाति सत्त्वे तदाभाति सर्वम् ।
यदालोचने हेयमन्यत्समस्तं
परं ब्रह्म नित्यं तदेवाहमस्मि ॥ ६ ॥

लेशैरस्ति

यदिति । यद्यस्यानन्दस्वरूपस्य ब्रह्मणो लेशैः समानन्दविश्वं तदेव ब्रह्माहमिति सम्बन्धः । यद्यस्मिन् ब्रह्मण्याभाति

भाति प्रियं इत्यंशत्रिकैः नामरूपात्मकं जडं विश्वं सुखात्मकवत्स्फुरतीति । पुरुषः कल्पितं सत्त्वं

सत्त्वे सत्यस्वरूपे प्रकाशमाने सति तदा पश्चाद् । भ्रमवशात्स्थाणाविव तदा विश्वं नास्तीत्यर्थः । तथा च

विश्वमाभाति । भ्रमे निवृत्ते तु ब्रह्मैव सत्यस्वरूपं ब्रह्मणः पृथक् पश्चात्सुगन्धिवनं पयोऽवगाहनामेव

मृगतृष्णिकायाश्च जलं गृहीत्वा गगनारविन्दं च विविच्य कश्चित् श्रवणमनननिदिध्यासनैः साक्षात्कृते

सत्त्वे चात्र प्रतिष्ठ इति ब्रूयादिति । यद्यस्मिन्ब्रह्मण्यालोचने नादरणीयमित्यर्थः । यत्परं

सति अन्यद् यद्भ्रमदशायां सत्यमिव भाति तत्समस्तं हेयं ब्रह्मव्यतिरेकेण

ब्रह्म तदेवाहमिति योजना ॥ ६ ॥

अध्यारोपावस्थायां तस्यैव ब्रह्मणः सृष्ट्यादिकारणत्वं दर्शयति—

अनन्तं विभुं सर्वयोनिं निरीहं शिवं सङ्गहीनं यदोङ्कारगम्यम् ।
निराकारमत्युज्ज्वलं मृत्युहीनं परंब्रह्म नित्यं तदेवाहमस्मि ॥ ७ ॥

